# Exercise 11 Page 51

II Decline fully: श्वश्रू

| स्त्रीः | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथमा | श्वश्रूः | श्वश्र्वौ | श्वश्र्वः |
| सम्बोधनम् | श्वश्रु | श्वश्र्वौ | श्वश्र्वः |
| द्वितीया | श्वश्रूम् | श्वश्र्वौ | श्वश्रूः |
| तृतीया | श्वश्र्वा | श्वश्रूभ्याम् | श्वश्रूभिः |
| चतुर्थी | श्वश्र्वै | श्वश्रूभ्याम् | श्वश्रूभ्यः |
| पञ्चमी | श्वश्र्वाः | श्वश्रूभ्याम् | श्वश्रूभ्यः |
| षष्ठी | श्वश्र्वाः | श्वश्र्वोः | श्वश्रूणाम् |
| सप्तमी | श्वश्र्वाम् | श्वश्र्वोः | श्वश्रूषु |

III. Conjugate the following in the potential mood ( विधिलिङ्) active voice (कर्तरि प्रयोगः):

कुप् (दिवादि गणः; be angry)

| परस्मैपदे | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | कुप्येत् | कुप्येताम् | कुप्येयुः |
| मध्यम | कुप्येः | कुप्येतम् | कुप्येत |
| उत्तम | कुप्येयम् | कुप्येव | कुप्येम |

प्र-बुध् (भ्वादि गणः; to wakeup)

| परस्मैपदे | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | प्रबोधेत् | प्रबोधेताम् | प्रबोधेयुः |
| मध्यम | प्रबोधेः | प्रबोधेतम् | प्रबोधेत |
| उत्तम | प्रबोधेयम् | प्रबोधेव | प्रबोधेम |

मृ (तुदादि गणः to die)

| आत्मनेपदे | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | म्रियेत | म्रियेयाताम् | म्रियेरन् |
| मध्यम | म्रियेथाः | म्रियेयाथाम् | म्रियेध्वम् |
| उत्तम | म्रियेय | म्रियेवहि | म्रियेमहि |

कृ (8th conjugation; to do)

| परस्मैपदे | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | कुर्यात् | कुर्याताम् | कुर्युः |
| मध्यम | कुर्याः | कुर्यातम् | कुर्यात |
| उत्तम | कुर्याम् | कुर्याव | कुर्याम |

अस् (अदादि गणः; to be)

| परस्मैपदे | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | स्यात् | स्याताम् | स्युः |
| मध्यम | स्याः | स्यातम् | स्यात |
| उत्तम | स्याम् | स्याव | स्याम |

IV. Translate the following into English after breaking up the sandhis:

१. श्वसूः वध्वै न कुप्येत् ।

1. May the mother-in-law not be angry at the bride.

२. मुनयोः अधितिष्ठेयुः आश्रमम् ।

2. May the sages stay in an ashram.

३. विद्या साधूनां निधिः स्यात् ।

3. May knowledge be the repository of the good people.

४. एकदा प्रातः प्राबोधं क्षेत्रेषु च अगच्छाम् ।

4. Once upon a time I woke up in the morning and went to the field.

५. हे नेतर् आदिश चम्वा वीराणां भयं न अस्ति ।

5. O leader, give command that there is no reason to fear by the army of the brave.

६. दुर्जनाः विद्यायै न कल्पेरन्।

6. Bad people are not to be (are not) fit for knowledge.

७. हे बालौ, सर्वदा सत्यं भाषेयाथाम् ।

7. O two children, may you always speak the truth.

८. असिना इव नेत्रेण ऋषिः जनानां मतीः विध्यति।

8. As if through a sword, the wise person pierces the minds of the people with his eye.

९. उत्तिष्ठन्तु नराः नार्यः च शत्रूणां च भयात् देशं मुञ्चन्तु।
9. Men and women should rise and free the country from the fear of the enemies.

१०. नृपतिं परितः दास्यः इव चन्द्रं परितः ताराः कम्पन्ते ।
10. Like maid-servants around a king, the stars tremble around the moon.

११. गुरवः शास्त्राणि अवगच्छेयुः ।
11. May the teachers know the scriptures.

१२. तोलयेः औषधम् ।
12. You should measure the medicine.

१३. पुस्तकेभ्यः एव विद्यां न लभेध्वम् ।
13. It is not possible for you to gain knowledge by books alone.

१४. यदि दुर्जनाः लोके जयेयुः मुनयः भाषाया निवर्तेरन् ।
14. If the wicked people were to win in the world, t the wise may be desisted by speech.

१५. ताडय यदि इच्छसि किन्तु पितुः आदेशं स्मर ।
15. If you wish to beat, but remember father's command.

१६. प्रातः प्रबोधेत् नरः, दुर्जनान् त्यजेत्, ईश्वरं पूजयेत्, भ्रातॄन् सान्त्वयेत्, सत्यं वदेत् यदि एषां कुर्यात् न कदापि दुःखस्य कारणं स्यात् ।
16. The man should wake up early in the morning, give up bad company, worship the Lord, console the brothers and speak the truth. If you were to do this, there will be no reason for sorrow.

V. Translate the following into Sanskrit.

1. On the order of the king the army may set out for the village.
१ नृपस्य आदेशात् चमूः ग्रामाय प्रचलयेयुः = नृपस्य आदेशाच्चमूः ग्रामाय प्रचलयेयुः ।

2. If you were to rise early, you would roam along the river's bank.
२ यदि प्रातः उत्तिष्ठेः नद्याः तीरे अटेः = यदि प्रात उत्तिष्ठेर्नद्यास्तीरेऽटेः।

3. People should know the modesty of the sages.
३ जनाः मुनिनाम् विनयम् अवगच्छेयुः = जना मुनिनां विनयमवगच्छेयुः ।

4. Wait a moment: I just put down (my) book and come.
४ क्षणम् कुरु मम पुस्तकम् निक्षिपेयम् आगच्छेयम् च = क्षणं कुरु मम पुस्तकं निक्षिपेयमागच्छेयं च ।

5. Maid-servants should follow the bride up to the house of (her) mother-in-law.

५ दास्यः श्वश्वाः गृहम् वधूम् अनुसरन्तु = दास्यः श्वश्वा गृहं वधूमनुसरन्तु ।

6. If you long for knowledge, you should dwell in a hermitage with (your) teacher

६. यदि ज्ञानाय इच्छसे गुरुणा सह आश्रमम् वस = यदि ज्ञानायेच्छसे गुरुणा सहाश्रमं वस ।

7. You tremble out of fear of God; you should worship God out of devotion.

७. ईश्वरस्य भयात् कम्पसे ईश्वरस्य भक्तेः पूजयः = ईश्वरसे भयात्कम्पस ईश्वरस्य भक्तेः पूजयः

।

8. Men live and die, kings conquer and perish; truth alone does not die.

८. नराः जीवेयुः म्रियेरन् च नृपतयः जेयुः नश्येयुः च किन्तु सत्यम् एव न म्रियते = नरा

जीवेयुर्म्रियेरंश्च नृपतयो जेयुर्नश्येयुश्च किन्तु सत्यमेव न म्रियते ।

9. Like a star in the sky, like a lotus in the lake, like a flower on a creeper, the sage should live in the world for the happiness of men.

९ आकाशे तारः इव ह्रदे कमलम् इव लतायाम् कुसुमम् इव मुनिः जनानाम् सुखाय लोके जीवेत् =

आकाशे तार इव ह्रदे कमलमिव लतायां कुसुममिव मुनिर्जनानां सुखाय लोके जीवेत् ।

10. Do not be angry with (your) friend; anger could only be the cause of sin.

१०. मित्रे न कुप्य क्रोधः पापस्य कारणम् स्यात् = मित्रे न कुप्य क्रोधः पापस्य कारणं स्यात् ।

# Excerise 12 Page 56

II. Translate the following into English after breaking up the sandhis:

१. व्याधितया स्वस्त्रा सह गृहं गच्छेयम् ।

1. I should go to the house along with (my) sick sister.

२. प्रसन्ने वारिणि पीनाः शिशवः दीव्यन्ति ।

2. The fat children play in the clear water.

३. अन्धस्य नृपतेः कृपणे दुहितरौ व्यपद्येताम् ।

3. Thetwo unfortunate daughters of the blind king fell into misfortune.

४. दात्र्यै मात्रे कुशलाः पुत्राः दुर्लभं रत्नं यच्छन्तु ।

4. The skillful sons should give the hard-to-get jewel to the generous mother.

५. तीव्रेण दुःखेन वृद्धयाः नार्याः नेत्राभ्याम् अश्रूणि द्रवन्ति ।

5. Tears run from the eyes of the old woman due to acute misery.

६. हे स्वसः पितुः गृहे तिष्ठेः ।

6. O sister, may you stay in father's house.

७. आशुना अश्वेन वीरः शत्रुम् अभ्यधावत् ।

7. The brave man attacked the enemy with the swift horse.

८. दुर्जनः खञ्जं नरम् अधिक्षिपति।

8. The bad man abuses the lame (person).

९. गुरून् भारान् दासाः शीर्षेः अकुर्वन् ।

9. The servants placed the heavy loads on the head.

१०. साध्वी दुहिता मातरं वन्दते ।

10. The virtuous daughter bows to the mother.

११. प्रभोः समक्षं दास्यौ जानुभ्यां भूमौ अपतताम् ।

11. The two female servants fell to the ground from their knees in the presence of the Lord.

१२. चारवः लताः सुरभीणि कुसुमानि च उद्याने रोहन्ति ।

12. Lovely creepers and fragrant flowers grow in the garden.

१३. कृत्रिमेण क्रोधेन क्षुद्रं बालं निन्दानि ।

13. I should scold the small child with artificial anger.

१४. यदि नित्यानि कार्याणि कुर्याः न विपद्येथाः ।

14. If you take care of your daily actions, you will not fall into misfortune.

१५. बहवः शिशवः मधुने स्पृहयन्ति ।
15. Many children desire for honey.

१६. अरेः तीव्रेण असिना हतं वीरं वन्दमहै ।
16. We should bow to the brave men killed by the sharp sword of the enemy.

१७. ग्रामं गन्तारः मुनयः कूपस्य स्वादु अम्बु पिबन्तु ।
17. The sages, going to the village, should drink the sweet water of the well.

१८. नवस्य प्रासादस्य पश्चात् क्षुद्राणि गृहाणि सन्ति।
18. There are small houses behind the new palace

III. Make the following adjectives agree with the following nouns:

कुशलेषु नरेषु । कुशलासु नारिषु । कुशलेन कविना । कुशलाय शत्रवे ।

शुची बालौ । शुचौ जले or शुचिनि जले । शुची मती । शुच्याः दुहितुः = शुच्या दुहितुः or शुचेः दुहितुः = शुचेर्दुहितुः ।

चारु कुसुमम् । चारुणः वारिणः = चारुणर्वारिणः । चारुणा बालिकया । चारुणि नद्याम् ।

वक्त्रा नृपेण । वक्तृ मित्रम् । वक्त्री गृहिणी । वक्त्रीणां श्वश्रूणाम् ।

IV. Translate the following into Sanskrit:

1. O Lord, be favourable!
१ हे ईश्वर प्रसन्नो भव।

2. A skillful leader obtains many things.
२. कुशला नेता बहूनि वस्तूनि प्रपद्यते ।

3. The one-eyed servant burnt the heap of soft wood.
३. काणः दासः मृदुणाम् दारुणाम् राशिम् अदहत् = काणो दासो मृदुणां दारुणां राशिमदहत् ।

4. A pure mind is like a fragrant flower.
४. शुचि मनः सुरभिम् कुसुमम् इव = शुचि मनः सुरभिं कुसुममिव ।

5. Let the eloquent queen lead the heroes.
५. वक्री राज्ञी वीरान् नयतु = वक्री राज्ञी वीरान्नयतु ।

6. Hail to the victorious king!
६. स्वस्ति जेत्रे नृपाय ।

7. You insult the wretched blind men, but you do not blame the wicked man.
७. त्वम् अन्धान् कृपाण् नरान् अधिक्षिपसि किन्तु दुष्टम् नरम् न निन्दसि = त्वमन्धान् कृपाण् नरान् अधिक्षिपसि किन्तु दुष्टं नरं न निन्दसि ।

8. Persons of the village carried the bodies of the dead heroes to the bank of the river.
८. ग्रामस्य नराः मृतानाम् वीराणाम् देहान् नद्याः तीरम् अवहन् = ग्रामस्य नरा मृतानां वीराणां देहान् नद्यास्तीरमवहन् ।

9. In the lovely garden many creepers and many trees scatter (their) fragrant flowers on the soft ground.
९. चारौ उद्याने बहवः लताः बहवः वृक्षाः च सुरभिणी पुष्पाणि मृदौ भूमौ व्यस्यन्ति = चारावुद्याने बहवो लता बहवो वृक्षाश्च सुरभिणी पुष्पाणि मृदौ भूमौ व्यस्यन्ति ।

10. Let the victorios hero pierce the enemy with (his) sharp sword.
१० जेता वीरः अरीन् तीव्रेण असिना व्यध्यतु = जेता वीरोऽरींस्तीव्रेणासिना व्यध्यतु ।

11. Sick and wretched, the travellers stood near the well.
११. व्याधिताः कृपणाः च गन्तृणि कूपम् निकषा अतिष्ठन् = व्याधिताः कृपणाश्च गन्तृणि कूपं निकषातिष्ठन् ।

12. In (his) new book the teacher has summarized many things.
१२. नवे पुस्तके गुरुः बहूनि वस्तूनि उपासंहरत = नवे पुस्तके गुरुर्बहूनि वस्तून्युपासंहरत ।

# Exercise 13 Page 61

II Conjugate

नी (भ्वादि गणः; लट् लकारः , कर्मण; to leadि )

| कर्मणि | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | नीयते | नीयेते | नीयन्ते |
| मध्यम | नीयसे | नीयेथे | नीयध्वे |
| उत्तम | नीये | नीयावहे | नीयामहे |

कृ (तनादि गणः; लट् लकारः कर्मणि; to do )

| कर्मणि | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | क्रियते | क्रियेते | क्रियन्ते |
| मध्यम | क्रियसे | क्रियेथे | क्रियध्वे |
| उत्तम | क्रिये | क्रियावहे | क्रियामहे |

दा (हवादि गणः लट् लट् लकारः कर्मणि; to give )

| कर्मणि | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | दीयते | दीयेते | दीयन्ते |
| मध्यम | दीयसे | दीयेथे | दीयध्वे |
| उत्तम | दीये | दीयावहे | दीयामहे |

चिन्त् (चुरादि गणः, लङ् लकारः; कर्मणि; to think)

| कर्मणि | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | अचिन्त्यत | अचिन्त्येताम् | अचिन्त्यन्त |
| मध्यम | अचिन्त्यथाः | अचिन्त्येथाम् | अचिन्त्यध्वम् |
| उत्तम | अचिन्त्ये | अचिन्त्यावहि | अचिन्त्यामहि |

मुच् (तनादि गणः; लङ् लकारः; कर्मणि; to release)

| कर्मणि | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | अमुच्यत | अमुच्येताम् | अमुच्यन्त |
| मध्यम | अमुच्यथाः | अमुच्येथाम् | अमुच्यध्वम् |

| | | | |
|---|---|---|---|
| **उत्तम** | **अमुच्ये** | **अमुच्यावहि** | **अमुच्यामहि** |

वि-जि (भ्वादि गणः; लङ् लकारः; कर्मणि, to vanquish)

| **कर्मणि** | **एकः** | **द्वौ** | **बहवः** |
|---|---|---|---|
| **प्रथम** | **व्यजीयत** | **व्यजीयेताम्** | **व्यजीयन्त** |
| **मध्यम** | **व्यजीयथाः** | **व्यजीयेथाम्** | **व्यजीयध्वम्** |
| **उत्तम** | **व्यजीये** | **व्यजीयावहि** | **व्यजीयामहि** |

सेव् (भ्वादि गणः; लोट् लकारः; कर्मणि; to serve)

| **कर्मणि** | **एकः** | **द्वौ** | **बहवः** |
|---|---|---|---|
| **प्रथम** | **सेव्यताम्** | **सेव्येताम्** | **सेव्यन्ताम्** |
| **मध्यम** | **सेव्यस्व** | **सेव्येथाम्** | **सेव्यध्वम्** |
| **उत्तम** | **सेव्यै** | **सेव्यावहै** | **सेव्यामहै** |

अधि-क्षिप् (तुनादि गणः; लोट् लकारः; कर्मणि; to offend)

| **कर्मणि** | **एकः** | **द्वौ** | **बहवः** |
|---|---|---|---|
| **प्रथम** | **अधिक्षिप्यताम्** | **अधिक्षिप्येताम्** | **अधिक्षिप्यन्ताम्** |
| **मध्यम** | **अधिक्षिप्यस्व** | **अधिक्षिप्येथाम्** | **अधिक्षिप्यध्वम्** |
| **उत्तम** | **अधिक्षिप्यै** | **अधिक्षिप्यावहै** | **अधिक्षिप्यामहै** |

चुर् (चुरादि गणः; लोट् लकारः; कर्मणि; to steal)

| **कर्मणि** | **एकः** | **द्वौ** | **बहवः** |
|---|---|---|---|
| **प्रथम** | **चोर्यताम्** | **चोर्येताम्** | **चोर्यन्ताम्** |
| **मध्यम** | **चोर्यस्व** | **चोर्येथाम्** | **चोर्यध्वम्** |
| **उत्तम** | **चोर्यै** | **चोर्यावहै** | **चोर्यामहै** |

तुद् ( तुदादि गणः; विधिलिङ्; कर्मणि; to strike)

| **कर्मणि** | **एकः** | **द्वौ** | **बहवः** |
|---|---|---|---|
| **प्रथम** | **तुद्येत** | **तुद्येयाताम्** | **तुद्येरन्** |
| **मध्यम** | **तुद्येथाः** | **तुद्येयाथाम्** | **तुद्येध्वम्** |

| | | | |
|---|---|---|---|
| उत्तम | तुद्येय | तुद्येवहि | तुद्येमहि |

स्मृ (भ्वादि गणः; विधिलिङ्; कर्मणि; to remember)

| कर्मणि | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | स्मर्येत | स्मर्येयाताम् | स्मर्येरन् |
| मध्यम | स्मर्येथाः | स्मर्येयाथाम् | स्मर्येध्वम् |
| उत्तम | स्मर्येय | स्मर्येवहि | स्मर्येमहि |

लभ् (भ्वादि गणः; विधिलिङ्; कर्मणि; to obtain)

| कर्मणि | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | लभ्येत | लभ्येयाताम् | लभ्येरन् |
| मध्यम | लभ्येथाः | लभ्येयाथाम् | लभ्येध्वम् |
| उत्तम | लभ्येय | लभ्येवहि | लभ्येमहि |

III. Translate the following into English:

एतस्मिन् देशे गोपाल: अभिधेयेन नृपति: अवसत् । In this country there lived a king by the name Gopala.

एकदा प्रातः तेन नगर्याः  मलहारक: अदृश्यत । Once in the morning the sweeper of the city was seen by him.

तस्य दर्शनेन नृपः भृशम्  अकुप्यत् ,  मलहारकस्य वधम् आदिशत् ।The king became greatly angry by his sight, and ordered the killing of the sweeper.

नृपते: आदेशेन निरपराधः जनः विमूढः अभवत् ।The innocent person became bewildered by the king's order.

नृपस्य सभायाम् सुमति: अभधेयेन पारिषद  आसीत् । In the king's court, there was a courtier by the name Sumati.

सः मलहारकम् अभाषत् -"वधात् पूर्वम् एव मम समीपम् आगच्छ । त्वया वचनम् भाष्यताम् ।" He told the sweeper, "You come near me before the killing and say (these) words."

वधस्य स्थानम् अगच्छत् मलहारकः । The sweeper went to the place of execution.

वधात् पूर्वम् सः सुमतेः समीपम् आगच्छत् । Before the execution he went near Sumati.

तम् वचनम् अभाषत । He spoke the words.

किन्तु तौ नृपेण अदृश्येताम् । But those two were seen by the king.

नपतिः सुमतिम् अपृच्छत् - "तेन दुर्जनेन किम् अभाष्यत ?" The king asked Sumati "What was spoken by that bad person?"

सुमतिः अवदत् - "एतद् तस्य वचनम् - प्रातः मया नृपः अवालोकयत । Sumati said "These are his words: 'The king was seen by me in the morning.

तस्य दर्शनात् मम वधः भवति । Because of his sight, my killing happens.

नृपेण अपि प्रातः अहम् अदृश्ये । I was also seen by the king in the morning.

किन्तु मम दर्शनात् तस्य वधः न अस्ति । But because of my sight he is not killed.

आवयोः कतरः दुर्जनः? Out of us two who is the bad person ?

नृपः एतानि वचनानि अचिन्तयत् । The king thought over these words.

क्षणात् अनन्तरम् सः क्रोधात् न्यवर्तत मलहारकम् च अमुञ्चत् । After a while his anger went away and he released the sweeper.

# Exercise 14 (page 67)

II. Translate the following into English and change the voice:

१. माता पुत्रं न कदापि विस्मरति । Mother never forgets (her) son. (Active)

Son is never forgotten by (her) mother. पुत्रः मात्रा न कदापि विस्मृयते । (Passive)

२. इदमन्तिमं कुसुमं तुभ्यं यच्छानि = इदम् अन्तिमं कुसुमं तुभ्यं यच्छानि (लोट् लकारः) । I should give you this last flower. (Active)

You should be given this last flower by me. त्वम् इदमन्तिमं कुसुमं मया दीयस्व (मध्यम पुरुषः एकवचनम् लोट् लकारः आत्मनेपदः) (Passive).

३. रामः सीतां वनेऽत्यजत् । Rama abandoned Sita in the forest. (Active)

Sita was abandoned by Rama in the forest. सीता वने रामेण अत्यज्यत । (Passive)

४. क्षुद्रः सर्पो हरिमदशत् ।Small snake bit Hari.(Active)

Hari was bitten by a small snake. हरिः क्षुद्रेण सर्पेण अदश्यत ।(Passive)

५. अमू (प्रातिपदिकम् अदस् (that) ; प्रथमा विभक्ति द्विवचनम्) कथां कथयत: (typo error in Antoine) । Those two tell a story.(Active)

The story is told by those two. कथा अमूभ्यां कथयते । (Passive)

६. दूतौ नृपतेः पुत्रमानयताम् = दूतौ नृपतेः पुत्रम् आनयताम् (लोट् लकारः)। The two messengers should bring king's son.) (Active)

The king's son should be brought by the two messengers. नृपतेः पुत्रः दूताभ्यां आनीयताम् (Passive)

७. नेतारं वीरैः सहानुसराम = नेतारं वीरैः सह अनुसराम (लोट् लकारः)। We, along with heros should follow the leader.(Active)

The leader should be followed by us, along with the heroes. नेता अस्माभिः वीरैः सह अनुसृयताम् । (Passive)

८. इमं लघुं भारं वह; अन्यथा प्रभुस्त्वां ताडयेत् = इमं लघुं भारं वह (लोट् लकारः); अन्यथा प्रभुः त्वां ताडयेत् (धातुः तड् (10th conjugation; casual form; विधिलिङ्) । Carry this light weight, or else the master may beat you. (Active)

Let this light weight be carried by you, otherwise you may be beaten by the master. लघुः भारः त्वया उहयताम् अन्यथा त्वं प्रभुना
ताड्येथाः (विधिलिङ्) । (Passive)

९. कन्याया वधोऽधमेन नरेणादिश्यते =कन्याया वधः अधमेन नरेण आदिश्यते । Daughter's killing is ordered by the lowly man (Passive)

The lowly man orders the killing of the daughter. अधमः नरः कन्यायाः वधम् आदिशति । (Active)

१०. मम वचनानि यदि यूयमवगच्छेत यूयमाशां न त्वजेत = मम वचनानि यदि यूयम् अवगच्छेत ( (विधिलिङ्) यूयम् आशां न त्वजेत (विधिलिङ्) । If you all should know my words, you all will not abandon hope. (Active)
If my words are known by you all , hope will not be abandoned by you all. मम वचनानि यदि युष्माभिः अवगम्येरन् (विधिलिङ्) आशा न युष्माभिः त्यज्येत ((विधिलिङ्) । (Passive)

११. वयं रामं वीरं मन्यामहे । We consider Rama to be hero. (Active)

Rama is considered to be hero by us. रामः अस्माभिः वीरः मन्यते । (Passive)

१२. त्वं पापमकरोः, अत एवाहं त्वां निन्दामि = त्वं पापम् अकरोः , अत एव अहं त्वां निन्दामि ।
You commiteed sin therefore I bleam you . (Active)
Sin was committed by you, therefore you are blamed by me. पापः त्वया अक्रियत अतः एव त्वम् मया निन्द्यसे । (Passive)

१३. स्तनेन बहूनि रत्नान्यचोर्यन्त ।Many jewels were stolen by the thief.(Passive)

The thief stole many jewels. स्तेनः बहूनि रत्नानि अचोरयत् ।(active)

१४. दुर्जनानां धनं विधिना ह्रयतामिति सुमतिनोद्यते = दुर्जनानां धनं विधिना ह्रयताम् इति सुमतिना उद्यते । ) Wicked people's wealth should be taken away by fate; thus is spoken by wise person.(Passive)
Fate should take away the wealth of a wicked person; thus speaks wise person. विधिः दुर्जनानां धनं हरतु इति सुमतिः वदति । (Active)

१५. चिरं प्रासादमधितिष्ठ । May you live long in the palace.(Active; लोट् लकारः)

May the palace be dwelled by you for a long time. प्रसादः चिरं त्वया अधिस्थीयताम्। (Passive)

१६. हे बालौ, युवामाचार्यं तूष्णीं सेवेयाथाम् (धातुः सेव् (भ्वादिगणः; आत्मनेपदः; विधिलिङ् ; मध्यम पुरुषः द्विवचनम्) ।You two boys should silently serve the teacher.(Active)
The teacher should be silently served by the two of you boys. आचार्यः युवाभ्यां बालाभ्यां तूष्णीं सेव्येत ।(Passive)

III. Translate the following into Sanskrit
1. That boundless ocean was seen by many heroes. असौ ( (प्रातिपदिकम् अदस् (that) ; प्रथमा विभक्ति एकवचनम्) असीमः उदधिः बहुभिः वीरैः अपश्यत ।(Passive)
2. Two trees were broken by the wind. द्वौ वृक्षौ अनिलेन अलुप्येताम् । (धातुः लुप् तुदादि गणः

) (Passive)

3. Let the thief be seized! स्तेन: गृह्येताम् । धातूः ग्रह् (9th conjugation; to seize) (Passive)

4. I am ordered by the preceptor. गुरुभिः अहं शिष्ये । (धातुः शास् (2nd conjugation; to command) (Passive)

5. Two cows were bound with a rope. धेनू रज्ज्वा अबध्येताम् । धातुः बन्ध् (9th conjugation; to bind) (Passive)

6. Enough with shame. अलं लज्जया ।

7. Let your tongue move and let your eyes shine. तव जिह्वा सरतु नेत्रौ च प्रकाशेताम् । लोट् लकारः

8. Our father was given (दुर्लभ) book (= a rare book was given to our father). दुर्लभं पुस्तकं अस्माकं जनकं अदीयत। (Passive)

9. The work should begun now.अधुना कर्म आरभ्यताम् । आ + धातुः रभ्; लोट् लकारः । (Passive)

10. If truth be not spoken you will be punished (potential).यदि सत्यं न उच्येत (passive धातुः वच् (2nd conjugation; विधिलिङ् ) त्वं दण्डयेथाः (धातुः दण्ड (10th conjugation; to punish; आत्मनेपदः विधिलिङ् (active) ।

11. They two may be blamed for their conduct. तौ तेषाम् आचारेण निन्देताम् । धातुः निन्द् (भ्वदि गणः) ( active )

12. For a long time the sage stood silently before the dead body of his son. मुनिः मृतस्य पुत्रस्य शरीरं अभितः चिरं तूष्णीं अतिष्ठत् ।

13. Let the wretched girls be brought to the house.' otherwise they might die. दीनाः बालाः गृहे आनीयताम् (लोट् लकार्ः passive) अन्यथा एनाः (प्रातिपदिकम् इदम् F; this द्वितीया वचनम् बहुवचनम्)) म्रियेरन् (विधिलिङ्)

14. You two should never forget your generous mother. युवां न कदापि युवयोः उदारं मातरं स्मरेतम् (धातुः स्मृ; विधिलिङ्; मध्यम पुरुषः द्विवचनम्)

15. Thou art called by thy father. त्वं तव जनकेन हूयसे ।

<u>Recapituation page 69</u>

III. Decline the following

चारुः कला (singular)

शुची जले (dual)

ते उदाराः नेतारः (plural)

अहम् (singular)

यूयम् (plural)

इमे  (F dual)

अमी  (M plural)

III. Conjugate the following

शुच्  in imperfect active (लङ् कर्तरि प्रयोगः)

| परस्मैपदे | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | अशोचत् | अशोचताम् | अशोचन् |
| मध्यम | अशोचः | अशोचतम् | अशोचत |
| उत्तम | अशोचम् | अशोचाव | अशोचाम |

भाष्  in imperative passive  (लोट् कर्मणि प्रयोगः)

| कर्मणि | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | भाष्यताम् | भाष्येताम् | भाष्यन्ताम् |
| मध्यम | भाष्यस्व | भाष्येथाम् | भाष्यध्वम् |
| उत्तम | भाष्यै | भाष्यावहै | भाष्यामहै |

सम्-पद्  in the potential active (विधिलिङ् कर्तरि प्रयोगः)

| आत्मनेपदे | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | संपद्येत | संपद्येयाताम् | संपद्येरन् |
| मध्यम | संपद्येथाः | संपद्येयाथाम् | संपद्येध्वम् |
| उत्तम | संपद्येय | संपद्येवहि | संपद्येमहि |

उद्-स्था  in the imperative active ( लोट् कर्तरि  प्रयोगः)

| परस्मैपदे | एकः | द्वौ | बहवः |
|---|---|---|---|
| प्रथम | उत्तिष्ठतु | उत्तिष्ठताम् | उत्तिष्ठन्तु |
| मध्यम | उत्तिष्ठ | उत्तिष्ठतम् | उत्तिष्ठत |
| उत्तम | उत्तिष्ठानि | उत्तिष्ठाव | उत्तिष्ठाम |

V. Translate into English the following verses taken from the Hitopadesha:
Verse 1

विद्या शस्त्रस्य शास्त्रस्य द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ॥

learning of the weapons [and] of the sciences - there are two types of knowledge for dignified living |
first is a matter of laughing in old age, second is respected always ||

विद्या (प्रातिपदिकम्, F, प्रथमा विभक्ति एकवचनम्) = knowledge, learning, study.

शस्त्रस्य (प्रातिपदिकम् शस्त्र, षष्ठी विभक्ति एकवचनम्) = of weapons

शास्त्रस्य = (प्रातिपदिकम् शास्त्र, षष्ठी विभक्ति एकवचनम्) =of sciences

द्वे = two

विद्ये = (two) (types) of विद्या

प्रतिपत्ति= gaining, obtaining, propounding, dignity (fame spreading)

प्रतिपत्तये = (प्रातिपदिकम्, प्रतिपत्ति, चतुर्थी विभक्ति एकवचनम्) for (-ye) obtaining, dignity, dignified living

आद्या = first one

हास्याय= for laughing, amusement (प्रातिपदिकम् हास्य)

वृद्धत्वे= in old age; वृद्ध= old person, वृद्धत्व= old-ness (old age)

द्वितीया_= second

आद्रियते = get respected;

सदा= always.

Verse # 2

यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ।।

As a chariot (cart) can't move with one wheel, similarly, without hard work destiny doesn't bring fruit.

यथा = as, like ( as in - "as this, so that")

ह्येकेन = = by one

चक्रेण = by wheel

न = not

रथस्य = of chariot

गतिः भवेत् = speed, happens

एव = and, similarly

पुरुषकारेण = by hard work

विना = without

दैवं = destiny, the 'forces'

न = not

सिध्यति = bears fruit.

Verse #3

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।

Work gets accomplished by effort, industry, not merely by wishing. the animals don't enter a sleeping lion's mouth.

उद्यमेन = by effort, work

हि = only

सिध्यन्ति = bear fruit

कार्याणि= projects

न = not

मनोरथैः = by wishing

न = not

हि = (emphasis)

सुप्तस्य = of sleeping

सिंहस्य = of lion

प्रविशन्ति = enter (loural)

मुखे = in mouth

मृगाः = animals

Verse #4

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किम् औषधैः ॥

Hey Arjuna, support the poor; do not bestow wealth on the Lord. Medicines are good for the afflicted. What is the use for medicines for the healthy?

Verse #5

दुर्जनेन समं सख्यं वैरञ्चाऽपि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥

Do not make a friend or an enemy of an evil person. [Because] a burning coal burns, cold [coal] blackens the hand

दुर्जनेन = by evil person

समं = equal

सख्यं = friendship (sakhI = friend)

वैरञ्चाऽपि = vairam + cha + api = and also animosity

न = not

कारयेत् =should do

उष्णः = = hot (due to burning)

दहति = burns

चाङ्गारः = chA~NgAraH = cha + a~NgAraH = and burning coal

शीतः = cold

कृष्णायते =blackens (कृष्ण = black)

करम् = hand